

॥ श्रीगुरुभ्यो नमः ॥

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

## प्रथमकाण्डे तृतीयः प्रश्नः

### अग्निष्टोमे पशुः

ॐ नमः परमात्मने । श्री गुरुभ्यो नमः । हरिः ॐ

दे॒वस्य॑ त्वा सवि॒तुः प्र॑स॒वे᳚ऽश्विनो᳚र् बा॒हुभ्यां᳚म्पू॒ष्णो हस्ता᳚भ्या॒माद॒देऽभ्रि॑रसि॒ नारि॑रसि॒ परि॑लि-
खि॒तꣳ॒ रख्षः॒ परि॑लिखिता॒ अरा॑तय इ॒द॒महꣳ॒ रख्ष॑सो ग्री॒वा अपि॑ कृन्ता॒मि यो᳚ऽस्मान् द्वेष्टि॒ यञ्च॑
व॒यन्द्वि॒ष्म इ॒दम॑स्य ग्री॒वा अपि॑ कृन्तामि दि॒वे त्वा॒ऽन्तरि॑ख्षाय त्वा पृथि॒व्यै त्वा॒ शुन्ध॑ताँल्लो॒कः
पि॑तृ॒षद॑नो॒ यवो॑ऽसि य॒वया॒स्मद्द्वेषो॑ ॥ [१] ॥ य॒वयारा॑तीः पि॒तृणाꣳ॒ सद॑नम॒स्युद्दिवꣳ॒॑ स्तभा॒-
नाऽन्तरि॑ख्षम्पृण पृथि॒वीन्दृ॑ꣳह द्युता॒नस्त्वा॑ मारु॒तो मि॑नोतु मि॒त्रावरु॑णयोर् ध्रु॒वेण॒ धर्म॑णा ब्रह्म॒-
वनि॑न्त्वा ख्षत्र॒वनिꣳ॑ सुप्रजा॒वनिꣳ॑ रायस्पोष॒वनि॒म्पर्यू॑हा॒मि ब्रह्म॑ दृꣳह ख्षत्र॒न्दृ॑ꣳह प्र॒जान्दृ॑ꣳह
रा॒यस्पोष॑न्दृꣳह घृ॒तेन॑ द्यावापृथिवी॒ आ पृ॑णेथा॒मिन्द्र॑स्य॒ सदो॑ऽसि वि॒श्वज॒नस्य॑ छा॒या परि॑ त्वा
गिर्वणो॒ गिर॑ इ॒मा भ॑वन्तु वि॒श्वतो॑ वृ॒द्धायु॒मनु॒ वृद्ध॑यो॒ जुष्टा॑ भवन्तु॒ जुष्ट॑य॒ इन्द्र॑स्य॒ स्यू॒रसी॒न्द्र॑स्य
ध्रु॒वम॑स्यै॒न्द्रम॑सी॒न्द्रा॑य त्वा ॥ [२] ॥

(द्वेष॑ इ॒मा अ॒ष्टाद॑श च) ॥ १ ॥

र॒ख्षो॒हणो॑ वलग॒हनो॑ वैष्ण॒वान् खना॑मी॒द॒महन्तव्ँ॑व॒ल॒गमुद्व॑पामि॒ यन्न॑स्स॒मा॒नो यम॑समानो
नि॒च॒खा॒ने॒दमे॑न॒मध॑रङ्करोमि॒ यो न॑स्समा॒नो योऽस॑मानोऽराती॒यति॑ गाय॒त्रेण॒ छन्द॒साऽव॑बाढो
व॒लगः॒ किमत्र॑ भ॒द्रन्तन्नौ॑ स॒ह वि॒राड॑सि सपत्न॒हा स॒म्राड॑सि भ्रातृव्य॒हा स्व॒राड॑स्यभिमाति॒हा

विश्वाराडसि विश्वासान्नाष्ट्राणाꣳ हन्ता ॥ [३] ॥ रख्षोहणो वलगहनः प्रोख्षामि वैष्णवान् रख्षोहणो वलगहनोऽव नयामि वैष्णवान् यवोऽसि यवयास्मद्द्वेषो यवयाराती रख्षोहणो वलगहनोऽव स्तृणामि वैष्णवान् रख्षोहणो वलगहनोऽभि जुहोमि वैष्णवान् रख्षोहणौ वलगहनावुप दधामि वैष्णवी रख्षोहणौ वलगहनौ पर्यूहामि वैष्णवी रख्षोहणौ वलगहनौ परि स्तृणामि वैष्णवी रख्षोहणौ वलगहनौ वैष्णवी बृहन्नसि बृहद्ग्रावा बृहतीमिन्द्राय वाचँव्वद ॥ [४] ॥

(हन्तेन्द्राय द्वे च) ॥ २ ॥

⋆

विभूरसि प्रवाहणो वह्निरसि हव्यवाहनः श्वात्रोऽसि प्रचेतास्तुथोऽसि विश्ववेदा उशिगसि कविरङ्घारिरसि बंभारिरवस्युरसि दुवस्वाञ्छुन्ध्यूरसि मार्जालीयस्सम्राडसि कृशानुः परिषद्योऽसि पवमानः प्रतक्वाऽसि नभस्वानसंमृष्टोऽसि हव्यसूद ऋतधामाऽसि सुवर्ज्योतिर् ब्रह्मज्योतिरसि सुवर्द्धामाऽजोऽस्येकपादहिरसि बुद्ध्नियो रौद्रेणानीकेन पाहि माऽग्ने पिपृहि मा मा मा हिꣳसीः ॥ [५] ॥

(अनीकेनाष्टौ च) ॥ ३ ॥

⋆

त्वꣳ सोम तनूकृद्भ्यो द्वेषोभ्योऽन्यकृतेभ्य उरु यन्ताऽसि वरूथꣳ स्वाहा जुषाणो अप्तुराज्यस्य वेतु स्वाहाऽयन्नो अग्निर्वरिवः कृणोत्वयम्मृधः पुर एतु प्रभिन्दन्न्। अयꣳ शत्रूञ्जयतु जर्हृषाणोऽयँव्वाजञ्जयतु वाजसातौ। उरु विष्णो वि क्रमस्वोरु ख्षयाय नः कृधि। घृतङ्घृतयोने पिब प्रप्र यज्ञपतिन्तिर। सोमो जिगाति गातुविद् ॥ [६] ॥ देवानामेति निष्कृतमृतस्य योनिमासदमदित्यास्सदोऽस्यदित्यास्सद आ सीदैष वो देव सवितस्सोमस्तꣳ रख्षद्ध्वम्मा वो दभदेतत्त्वꣳ सोम देवो देवानुपागा इदमहम्मनुष्यो मनुष्यान्थ्सह प्रजया सह रायस्पोषेण नमो देवेभ्यस्स्वधा पितृभ्य इदमहन्निर्वरुणस्य पाशाथ्सुवरभि ॥ [७] ॥ वि ख्येषँव्वैश्वानरञ्ज्योतिरग्ने व्रतपते त्वँव्व्रतानाँव्व्रतपतिरसि या मम तनूस्त्वय्यभूदियꣳ सा मयि या तव तनूर् मय्यभूदेषा सा त्वयि यथायथं नौ व्रतपते व्रतिनोर् व्रतानि ॥ [८] ॥

(गा॒तु॒विद्भ्येक॑त्रिꣳशच्च) ॥ ४ ॥

---

अत्य॒न्यानगा॒न्नान्यानुपा॑गामर्वा॒क्त्वा॒ परै॒रवि॑दम्प॒रोऽव॑रै॒स्तन्त्वा॑ जुषे वैष्ण॒वन्दे॑वय॒ज्यायै॑
दे॒वस्त्वा॑ सवि॒ता मद्ध्वा॑ऽनक्त्वोष॑धे॒ त्राय॑स्वैनग्ँ॒ स्वधि॑ते॒ मैन॑ꣳ हिꣳसी॒र् दिव॒मग्रे॑ण॒ मा ले॑खी-
र॒न्तरि॑ख्ष॒म्मद्ध्ये॑न॒ मा हिꣳ॑सीः पृथि॒व्या सम्भ॑व॒ वन॑स्पते श॒तव॑ल्शो॒ वि रो॑ह स॒हस्र॑वल्शा॒
वि व॒यꣳ रु॑हेम॒ यन्त्वा॒ऽयग्ँ॒ स्वधि॑तिस्तेति॑जानः प्रणि॒नाय॑ मह॒ते सौभ॑गाया॒च्छि॑न्नो॒ राय॑ः
सु॒वीर॑ः ॥ [९] ॥

(यंद॑श॒ च) ॥ ५ ॥

---

पृ॒थि॒व्यै त्वा॒न्तरि॑ख्षाय त्वा दि॒वे त्वा॒ शुन्ध॑तांल्लो॒कः पि॑तृ॒षद॑नो॒ यवो॑ऽसि य॒वया॒स्मद् द्वेषो॑
य॒वयारा॑तीः पितृ॒णाꣳ सद॑नमसि स्वावे॒शो॑ऽस्यग्रे॒गा ने॑तृ॒णाँव्व॒न॒स्पति॒रधि॑ त्वा स्थास्यति॒ तस्य॑
वित्ताद् दे॒वस्त्वा॑ सवि॒ता मद्ध्वा॑ऽनक्तु सुपिप्प॒लाभ्य॒स्त्वौष॑धीभ्य॒ उद्दिव॑ग्ँ स्तभा॒नाऽन्तरि॑ख्ष-
म्पृण पृथि॒वीमु॒पर॑ेण दृꣳह॒ ते ते॒ धामा॑न्युश्मसी ॥ [१०] ॥ ग॒मद्ध्ये॒ गावो॒ यत्र॒ भूरि॑शृङ्गा
अ॒यास॑ः। अत्राह॒ तदु॑रुगा॒यस्य॒ विष्णो॑ः प॒रमम्प॒दमव॑ भाति॒ भूरे॑ः॥ विष्णो॒ः कर्मा॑णि पश्यत॒
यतो॑ व्र॒तानि॑ पस्प॒शे। इन्द्र॑स्य॒ युज्य॒ः सखा॑॥ तद्विष्णो॑ः प॒रमम्प॒दꣳ सदा॑ पश्यन्ति सू॒रय॑ः।
दि॒वीव॒ चख्षु॒रात॑तम्॥ ब्र॒ह्म॒वनि॑न्त्वा ख्षत्र॒वनिꣳ॑ सुप्रजा॒वनिꣳ॑ रायस्पोष॒वनि॑म्पर्यू॑हा॒मि ब्रह्म॑
दृꣳह ख्ष॒त्रं दृꣳ॑ह प्र॒जान्दृꣳ॑ह रा॒यस्पोष॑न्दृꣳह परि॒वीर॑सि॒ परि॑ त्वा॒ दैवी॒र्विशो॑ व्ययन्ता॒म्परी॒मꣳ
रा॒यस्पोषो॒ यज॑मानम्मनु॒ष्या॑ अ॒न्तरि॑ख्षस्य त्वा॒ सानाव॑व गूहामि ॥ [११] ॥

(उ॒श्म॒सी॒पो॒ष॒मेका॒न्नवि॑ꣳशतिश्च) ॥ ६ ॥

---

इ॒षे त्वो॑प॒वीर॑स्युपो॑ दे॒वान् दैवी॒र् विश॒ः प्रागु॒र् वह्नी॑रु॒शिजो॒ बृह॑स्पते धा॒रया॒ वसू॑नि ह॒व्या
ते॑ स्वदन्ता॒न्देव॑ त्वष्ट॒र्वसु॑ रण्व॒ रेव॑ती॒ रम॑द्ध्वम॒ग्नेर् ज॒नित्र॑मसि॒ वृष॑णौ स्थ उ॒र्वश्य॑स्या॒युर॑सि

पुरूरवा घृतेनाक्ते वृषणन्दधाथाङ्गायत्रञ्छन्दोऽनु प्र जायस्व त्रैष्टुभञ्जागतञ्छन्दोऽनु प्र जायस्व भवतं ॥ [१२] ॥ नः समनसौ समोकसावरेपसौ। मा यज्ञꣳ हिꣳसिष्टम्मा यज्ञपतिञ्जातवेदसौ शिवौ भवतमद्य नः॥ अग्नावग्निश्चरति प्रविष्ट ऋषीणाम्पुत्रो अधिराज एषः। स्वाहाकृत्य ब्रह्मणा ते जुहोमि मा देवानाम्मिथुया कर्भागधेयम् ॥ [१३] ॥

(भवतमेकत्रिꣳशच्च) ॥ ७ ॥

आ ददृ ऋतस्य त्वा देवहविः पाशेनाऽऽरभे धर्षा मानुषानद्भ्यस्त्वौषधीभ्यः प्रोक्षाम्यपाम्पेरुरसि स्वात्तञ्चिथ् सदेवꣳ हव्यमापो देवीः स्वदतैनꣳ सन्ते प्राणो वायुना गच्छताꣳ सय्ँयजत्रैरङ्गानि सय्ँयज्ञपतिराशिषा घृतेनाक्तौ पशुन्त्रायेथाꣳ रेवतीर् यज्ञपतिम्प्रियधाऽऽ* विशतोरो अन्तरिक्ष सजूर् देवेन ॥ [१४] ॥ वातेनास्य हविषः त्मना यज समस्य तनुवा भव वर्षीयो वर्षीयसि यज्ञे यज्ञपतिन्धाः पृथिव्याः संपृचः पाहि नमस्त आतानाऽनर्वा प्रेहि घृतस्य कुल्यामनु सह प्रजया सह रायस्पोषेणाऽऽपो देवीः शुद्धायुवः शुद्धा यूयन्देवाꣳ ऊढ्वꣳ शुद्धा वयम्परिविष्टाः परिवेष्टारो वो भूयास्म ॥ [१५] ॥

(देवेनचतुश्चत्वारिꣳशच्च) ॥ ८ ॥

वाक्त आ प्यायताम्प्राणस्त आ प्यायताञ्चक्षुस्त आ प्यायताꣳ श्रोत्रन्त आ प्यायताय्ँया ते प्राणाञ्छुग्जगाम या चक्षुर्या श्रोत्रय्ँयत्ते क्रूरय्ँयदास्थितन्तत्त आ प्यायतान्तत्त एतेन शुन्धतान्नाभिस्त आ प्यायताम्पायुस्त आ प्यायताꣳ शुद्धाश्चरित्राः शमद्भ्यः ॥ [१६] ॥ शमोषधीभ्यः शम्पृथिव्यै शमहोभ्यामोषधे त्रायस्वैनꣳ स्वधिते मैनꣳ हिꣳसी रक्षसाम्भागोऽसीदमहꣳ रक्षोऽधमन्तमो नयामि योऽस्मान् द्वेष्टि यञ्च वयन्द्विष्म इदमेनमधमन्तमो नयामीषे त्वा घृतेन द्यावापृथिवी प्रोर्ण्वाथामच्छिन्नो रायः सुवीर उर्वन्तरिक्षमन्विहि वायो वीहि स्तोकानाꣳ स्वाहोद्ध्र्वनभसम्मारुतङ्गच्छतम् ॥ [१७] ॥

(अद्भ्योवीहिपञ्च च) ॥ ९ ॥

सन्ते मनसा मनः सम्प्राणेन प्राणो जुष्टन्देवेभ्यो हव्यङ्घृतवथ् स्वाहैन्द्रः प्राणो अङ्गेअङ्गे नि देद्ध्यदैन्द्रोऽपानो अङ्गेअङ्गे वि बोभुवद्देव त्वष्टर्भूरि ते सꣳसमेतु विषुरूपा यथ् सलख्ष्माणो भवथ देवत्रा यन्तमवसे सखायोऽनु त्वा माता पितरो मदन्तु श्रीरस्यग्निस्त्वा श्रीणात्वापः समरिणन् वातस्य ॥ [१८] ॥ त्वा ध्रज्यै पूष्णो रꣳह्या अपामोषधीनाꣳ रोहिष्यै घृतङ्घृतपावानः पिबत वसाँव्वसापावानः पिबताऽन्तरिख्षस्य हविरसि स्वाहा त्वाऽन्तरिख्षाय दिशः प्रदिश आदिशो विदिश उद्दिशः स्वाहा दिग्भ्यो नमो दिग्भ्यः ॥ [१९] ॥

(वातस्याष्टाविꣳशतिश्च) ॥ १० ॥

समुद्रङ्गच्छ स्वाहाऽन्तरिख्षङ्गच्छ स्वाहा देवꣳ सवितारङ्गच्छ स्वाहाऽहोरात्रे गच्छ स्वाहा मित्रावरुणौ गच्छ स्वाहा सोमङ्गच्छ स्वाहा यज्ञङ्गच्छ स्वाहा छन्दाꣳसि गच्छ स्वाहा द्यावा-पृथिवी गच्छ स्वाहा नभो दिव्यङ्गच्छ स्वाहाऽग्निँव्वैश्वानरङ्गच्छ स्वाहाऽद्भ्यस्त्वौषधीभ्यो मनो मे हार्दि यच्छ तनूत्त्वचम्पुत्रन्नप्तारमशीय शुगसि तमभि शोच योऽस्मान् द्वेष्टि यञ्च वयन्द्विष्मो धाम्नोधाम्नो राजन्नितो वरुण नो मुञ्च यदापो अघ्निया वरुणेति शपामहे ततो वरुण नो मुञ्च ॥ [२०] ॥

(असिषड्विꣳशतिश्च) ॥ ११ ॥

हविष्मतीरिमा आपो हविष्माँन् देवो अद्ध्वरो हविष्माꣳ आ विवासति हविष्माꣳ अस्तु सूर्यः ॥ अग्नेर्वोऽपन्नगृहस्य सदसि सादयामि सुम्नाय सुम्निनीः सुम्ने मा धत्तेन्द्राग्नियोर् भागधेयीः स्थ मित्रावरुणयोर् भागधेयीः स्थ विश्वेषान्देवानाम्भागधेयीः स्थ यज्ञे जागृत ॥ [२१] ॥

(हविष्मतीश्चतुस्त्रिꣳशत्) ॥ १२ ॥

हृदे त्वा मनसे त्वा दिवे त्वा सूर्याय त्वोर्द्ध्वमिममद्ध्वरङ्कृधि दिवि देवेषु होत्रा यच्छ सोम राजन्नेह्यव रोह मा भेर्मा सव्ँविक्था मा त्वा हिꣳसिषम्प्रजास्त्वमुपावरोह प्रजास्त्वामुपा-वरोहन्तु शृणोत्वग्निः समिधा हवम्मे शृण्वन्त्वापो धिषणाश्च देवीः। शृणोत ग्रावाणो विदुषो नु ॥ [२२] ॥ यज्ञꣳ शृणोतु देवः सविता हवम्मे। देवीरापो अपान्नपाद्य ऊर्मिर्हविष्य इन्द्रि-यावान् मदिन्तमस्तन्देवेभ्यो देवत्रा धत्त शुक्रꣳ शुक्रपेभ्यो येषाम्भागः स्थ स्वाहा कार्षिरस्य-पाऽपाम्मृद्ध्रꣳ समुद्रस्य वोऽक्षित्या उन्नये। यमग्ने पृथ्सु मर्त्यमावो वाजेषु यञ्जुनाः। स यन्ता शश्वतीरिषः ॥ [२३] ॥

(नुसप्तचत्वारिꣳशच्च) ॥ १३ ॥

⋆

त्वमग्ने रुद्रो असुरो महो दिवस्त्वꣳ शर्द्धो मारुतम्पृक्ष ईशिषे। त्वव्ँवातैररुणैर्यासि शंग-यस्त्वम्पूषा विधतः पासि नुत्मना॥ आ वो राजानमद्ध्वरस्य रुद्रꣳ होतारꣳ सत्ययजꣳ रोदस्योः। अग्निम्पुरा तनयित्नो रचित्ताद्धिरण्यरूपमवसे कृणुद्ध्वम्॥ अग्निर्होता निषसादा यजीयानुपस्थे मातुः सुरभावु लोके। युवा कविः पुरुनिष्ठ ॥ [२४] ॥ ऋतावा धर्ता कृष्टीनामुत मद्ध्य इद्धः॥ साद्ध्वीमकर् देववीतिन्नो अद्य यज्ञस्य जिह्वामविदाम गुह्याम्। स आयुराऽगात् सुरभिर्वसानो भद्रामकर् देवहूतिन्नो अद्य॥ अक्रन्ददग्निः स्तनयन्निव द्यौः क्षामा रेरिहद्वी-रुधः समञ्जन्। सद्यो जज्ञानो वि हीमिद्धो अख्यदा रोदसी भानुना भात्यन्तः॥ त्वे वसूनि पुर्वणीक ॥ [२५] ॥ होतर्दोषा वस्तोरेरिरे यज्ञियासः। क्षामेव विश्वा भुवनानि यस्मिन्थ् सꣳ सौभगानि दधिरे पावके॥ तुभ्यन्ता अङ्गिरस्तम विश्वाः सुक्षितयः पृथक्। अग्ने कामाय येमिरे॥ अश्याम तङ्काममग्ने तवोत्यश्याम रयिꣳ रयिवः सुवीरम्। अश्याम वाजमभि वाज-यन्तोऽश्याम द्युम्नमजराजरन्ते॥ श्रेष्ठय्ँयविष्ठ भारताग्ने द्युमन्तमा भर ॥ [२६] ॥ वसो पुरु-स्पृहꣳ रयिम्॥ स श्वितानस्तन्यतू रोचनस्था अजरेभिर् नानदद्भिर्यविष्ठः। यः पावकः पुरु-तमः पुरूणि पृथून्यग्निरनुयाति भर्वन्न्॥ आयुष्टे विश्वतो दधदयमग्निर् वरेण्यः। पुनस्ते प्राण आऽयति परा यक्ष्मꣳ सुवामि ते॥ आयुर्दा अग्ने हविषो जुषाणो घृतप्रतीको घृतयोनिरेधि। घृतम्पीत्वा मधु चारु गव्यम्पितेव पुत्रमभि ॥ [२७] ॥ रक्षतादिमम्। तस्मै ते प्रतिहर्यते

जा॒तवे॑दो॒ विच॑र्षणे। अग्ने॒ जना॑मि सुष्टु॒तिम्॥ दि॒वस्परि॑ प्रथ॒मञ्ज॑ज्ञे अ॒ग्निर॒स्मद्॒ द्वि॒तीय॒म्परि॑ जा॒तवे॑दाः। तृ॒तीय॑म॒प्सु नृ॒मणा॒ अज॑स्र॒मिन्धा॑न एनञ्जरते स्वा॒धीः॥ शुचि॑ः पावक॒ वन्द्योऽग्ने॑ बृ॒हद्वि रो॑चसे। त्वङ्घृ॒तेभि॒राहु॑तः॥ दृ॒शा॒नो रु॒क्म उ॒र्व्या व्य॑द्यौद्दु॒मर्॒षमायु॑ः श्रि॒ये रु॑चा॒नः। अ॒ग्निर॒मृतो॑ अभवद्वयो॑भि॒र् ॥ [२८] ॥ यदे॑नन्द्यौरज॑नयथ्सु॒रेता᳚ः॥ आ यदि॒षे नृ॒पति॒न्तेज॒ आन॒ट्छुचि॒ रेतो॒ निषि॑क्त॒न्द्यौर॒भीके᳚। अ॒ग्निः शर्द्ध॑मनव॒द्यय्युवा॑नꣳ स्वा॒धिय॑ञ्जनयथ्सू॒दय॑च्च॥ स तेजी॑यसा॒ मन॑सा॒ त्वोत॑ उ॒त शि॑क्ष स्वप॒त्यस्य॑ शि॒क्षोः। अग्ने॑ रा॒यो नृत॑मस्य॒ प्रभू॑तौ भू॒याम॑ ते सुष्टु॒तय॑श्च॒ वस्व॑ः॥ अग्ने॒ सह॑न्त॒मा भ॑र द्यु॒म्नस्य॑ प्रा॒सहा॑ र॒यिम्। विश्वा॒ य ॥ [२९] ॥ श्च॒र्॒षणीर॒भ्या॑सा॒ वाजे॑षु सा॒सह॑त्॥ तम॑ग्ने पृतना॒सह॑ꣳ र॒यिꣳ स॑हस्व॒ आ भ॑र। त्वꣳ हि स॒त्यो अद्भु॑तो दा॒ता वाज॑स्य॒ गोम॑तः॥ उ॒क्षान्ना॑य व॒शान्ना॑य॒ सोम॑पृष्ठाय वे॒धसे᳚। स्तोमै᳚र् विधेमा॒ऽग्नये᳚॥ व॒द्मा हि सू॑नो॒ अस्य॑-द्म॒सद्वा॑ च॒क्रे अ॒ग्निर् ज॒नुषाऽज्माऽन्न᳚म्। स त्वन्न॑ ऊर्जसन॒ ऊर्ज॑न्धा॒ राजे॑व जेरवृ॒के क्षे᳚ष्य॒न्तः॥ अग्न॒ आयू॑ꣳषि ॥ [३०] ॥ पव॑स॒ आ सु॒वोर्ज॒मिष॑ञ्च नः। आ॒रे बा॑धस्व दु॒च्छुना᳚म्॥ अग्ने॒ पव॑स्व॒ स्वपा॑ अ॒स्मे वर्च॑ः सु॒वीर्य᳚म्। द॒धत्पोष॑ꣳ र॒यिम्मयि॑॥ अग्ने॑ पावक रो॒चिषा॑ म॒न्द्रया॑ देव जि॒ह्वया᳚। आ दे॒वान्व॑क्षि॒ यक्षि॑ च॥ स न॑ः पावक दीदि॒वोऽग्ने॑ दे॒वाꣳ इ॒हा व॑ह। उप॑ य॒ज्ञꣳ ह॒विश्च॑ नः॥ अ॒ग्निः शुचि॑व्रततम॒ः शुचि॒र् विप्र॒ः शुचि॑ः क॒विः। शुची॑ रोचत॒ आहु॑तः॥ उद॑ग्ने॒ शुच॑य॒स्तव॑ शु॒क्रा भ्राज॑न्त ईरते। तव॒ ज्योती॑ꣳष्य॒र्चय॑ः ॥ [३१] ॥

(विप्र॒ः शु॒चिश्च॒तुर्द॑श च) ॥ १४ ॥

## समाप्ति कोर्वैः

(दे॒वस्य॑रक्षो॒हणो॑ वि॒भूस्त्वꣳ सोमा॒ऽत्य॒न्या॒नगा॑ पृ॒थि॒व्या इ॒षे त्वा ऽऽद॑दे॒ वाक्ते॒सन्ते॑ समु॒द्रꣳ ह॒विष्म॑ती॒र्हृ॒दे त्वम॑ग्ने रु॒द्रश्च॒तुर्द॑श)

(दे॒वस्य॑गमध्ये॑ह॒विष्म॑तीःपवस॒एक॑त्रिꣳशत्)

(दे॒वस्या॒र्चय॑ः)

॥ हरिः ॐ ॥

प्रथमकाण्डे तृतीयः प्रश्नः समाप्तः

| अनुवाकाः | पञ्चशत्यः |
|---|---|
| १४ | ३१ |

ॐ